# संस्कृतवार्ता:

दिनाङ्क: - 20/12/2024 सायम् - 06:20

मुख्यवार्ताः

- प्रधानमन्त्री नरेन्द्रमोदी श्वः कुवैत-देशस्य द्विदिवसीय-यात्रायां भविष्यति।
- उभौ सदनौ अनिश्चितकालं यावत् स्थगितौ।
- लोकसभया "एकं राष्ट्रम् एकं निर्वाचनं" सम्बद्धौ द्वौ विधेयकौ संसदः संयुक्तसमितेः कृते निर्दिष्टौ।
- राष्ट्रपतिः द्रौपदी मुर्मुः अकथयत् यत्, अधुना भारते प्रौद्योगिकीय-दृष्ट्या उन्नतोपकरणानां निर्माणेन स्वावलम्बनस्य नूतनचरणस्य आरम्भस्य समयः अस्ति।
- राजस्थाने अद्य प्रातः जयपुरस्य भाङ्करोटा-क्षेत्रे घटितस्य गैसटैंकर इति वातीन्धन-वाहक-यानयोः अग्नि-प्रसङ्गे मृतानां सङ्ख्या नव-पर्यन्तं वर्धिता अस्ति, त्रिंशत् यावत् जनाः घातिताः च सन्ति।

प्रधानमन्त्री- कुवैतयात्रा

प्रधानमन्त्री नरेन्द्रमोदी श्वः कुवैत-देशस्य आमीर् शेख् मेशल् अल्-अहमद् अल्-जबेर अल्-सबाह् इत्यस्य आमन्त्रणे सति द्विदिवसीय-यात्रायां भविष्यति। अस्मिन्नवधौ प्रधानमन्त्री कुवैत-देशस्य नेतृभिः सह चर्चां करिष्यति। प्रधानमन्त्री कुवैत-देशे भारतीय-समुदायेन सह अपि संवादं करिष्यति। अद्य सायङ्काले नवदिल्ल्यां वार्ताहरान् संसूचयन् सचिवः अरुणकुमार-चटर्जी अवदत् यत्, त्रिचत्वारिंशत् वर्षेषु भारतीय-प्रधानमन्त्रिणः कुवैत-देशस्य एषा प्रथमा यात्रा भविष्यति इति। अस्मिन् वर्षे सितम्बर-मासे यू. एन्. जी. ए. इत्यस्य सत्रस्य समये प्रधानमन्त्री सद्यः एव कुवैत-देशस्य युवराजं मिलितवान्।

संसद

लोकसभायाः राज्यसभायाः च अनिश्चितकालं यावत् स्थगनस्य कारणात् अद्य संसदः शीतकालीनसत्रं समाप्तम्। लोकसभायां अद्य प्रातः यदा सभा आरब्धा, तदा डा. बी. आर्. अम्बेडकर् वर्यस्य विषये केन्द्रीय-गृहमन्त्रिणः अमितशाहस्य वक्तव्यस्य विषये विपक्षस्य सदस्याः कोलाहलं कृतवन्तः। कोलाहलस्य मध्ये, अध्यक्षः ओम बिरला सांसदेभ्यः आग्रहम् अकरोत् यत्

सर्वे नियमान् कठोरतया पालयन्तु, संसदः कस्मिन् अपि द्वारे विरोधं न कुर्युः इति। सः तान् कस्यापि विचलनस्य सन्दर्भे कार्यजातस्य पूर्वसूचनाम् अददात्।

कोलाहलस्य मध्ये, लोकसभया "एकं राष्ट्रम् एकं निर्वाचनं" सम्बद्धौ द्वौ विधेयकौ संसदः संयुक्तसमितेः कृते निर्दिष्टौ। समितौ लोकसभायाः सप्तविंशतिः सदस्याः, राज्यसभायाः द्वादश सदस्याः च सन्ति।

समितिः अग्रिमसंसद-सम्मेलनस्य अन्तिम-सप्ताहाभ्यन्तरे प्रथमदिवसे एव स्वप्रतिवेदनं सभायां समर्पयिष्यति। पश्चात् अध्यक्षः ओम बिरला सभां अनिश्चितकालं यावत् स्थगितवान्।

राज्यसभायाम् अपि प्रातःकाले पक्षस्य विपक्षस्य च मध्ये घोषाणां, प्रति-घोषणानां च अनन्तरं कोलाहलपूर्णानि दृश्यानि दृष्टानि। कोलाहलमध्ये सभापतिः जगदीप-धनखडः अपराह्णे द्वादश-वादनं यावत् सभां स्थगितवान्। यदा अपराह्णे उच्चसदनस्य पुनः संयोजनं जातम्, तदा "एकं राष्ट्रम् एकं निर्वाचनं" इत्येतस्य विधेयकस्य विषये संसदः संयुक्तसमितेः कृते द्वादश-सदस्यानां नामाङ्कनस्य प्रस्तावः प्रस्तावितः। सभापतिः जगदीप-धनखडः स्वीये समापन-भाषणे दुःखं प्रकटितवान् यत् अस्मिन् सत्रे निरन्तर-बाधायाः कारणात् उत्पादकता केवलं चत्वारिंशत् प्रतिशतं यावत् आसीत्। असौ अवदत् यत् 'सप्तषष्ट्युत्तर द्विशत' इत्यस्य नियमस्य अन्तर्गतं प्रस्तावस्य अनुचितप्रक्षेपणं निरशायुतम् अस्ति।

पश्चात् धनखड-वर्यः उच्चसदनम् अनिश्चितकालं यावत् स्थगितवान्। गतमासस्य पञ्चविंशतिः दिनाङ्के संसदः शीतकालीन-सत्रं प्रारब्धम् आसीत्।

राष्ट्रपति

राष्ट्रपतिः द्रौपदी मुर्मुः अकथयत् यत्, अधुना भारते प्रौद्योगिकीय-दृष्ट्या उन्नतोपकरणानां निर्माणेन स्वावलम्बनस्य नूतनचरणस्य आरम्भस्य समयः अस्ति। राष्ट्रपतिः सशस्त्रसेवानां स्वावलम्बनाय, आत्मनिर्भर-भारतस्य सङ्कल्पं साकारयितुं च योगदानं कर्तुम् आदिष्टवती।

राष्ट्रपतिः मुर्मुः अद्य तेलङ्गाना-राज्ये आयोजिते औपचारिक-कार्यक्रमे सिकन्दराबाद-नगरस्य प्रतिष्ठित-रक्षा-प्रबन्धन-महाविद्यालयाय president's colours इति राष्ट्रपति-वर्ण-पुरस्कारं प्रदानं कृत्वा सम्बोधितवती। Presidential colours इति कस्यापि संस्थानस्य व्यावसायिक-उत्कृष्टतायाः प्रमाणम् अस्ति। राष्ट्रपतिः अवदत् यत् देशस्य आत्मनिर्भरता, रक्षाक्षेत्रे सामरिकसहभागिता च न केवलं देशस्य सीमायाः रक्षणं करिष्यति अपितु तस्य सामरिक-वैश्विक-सहभागित्वम् अपि सुदृढं करिष्यति इति। एषा अकथयत् यत् प्रशासनेन रक्षा-उद्योगस्य स्वदेशीय-क्षमतानां वर्धनाय अनेकाः उपायाः कृताः, यद्यपि अस्माकं रक्षाक्षेत्रे निवेशं प्रोत्साहयितुं अनेकाः उपक्रमाः कृताः।

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।

राजस्थान-दुर्घटना

राजस्थाने अद्य प्रातः जयपुरस्य भाङ्करोटा-क्षेत्रे घटितस्य गैसटैंकर इति वातीन्धन-वाहक-यानयोः अग्नि-प्रसङ्गे मृतानां सङ्ख्या नव-पर्यन्तं वर्धिता अस्ति, त्रिंशत् यावत् जनाः घातिताः च सन्ति। अजमेर-राजमार्गस्य समीपे प्रातः षड्वादने वातीन्धन-वाहक-वाहनौ सङ्घटितौ जातौ। घटनायाः अनन्तरं अग्निकाण्डे ऊनत्रिंशत् ट्रक वाहनानि द्वे बसयाने च समेत्य प्रायः चत्वारिंशत् वाहनानि नष्टानि अभवन्। अग्निकाण्डे चत्वारः जनाः घटनास्थले एव मृत्युमुपगताः, अन्ये त्रयः जनाः चिकित्सावधौ मृताः जाताः। अस्याः घटनायाः अन्वेषणाय उच्चस्तरीयसमित्याः निर्माणं कृतम्। अस्माकं संवाददात्रानुसारी घटनायाः अनन्तरं सम्पूर्णे क्षेत्रे अराजकतायाः स्थितिः अभवत्। प्रधानमन्त्री नरेन्द्रमोदी अद्य राजस्थानस्य मुख्यमन्त्रिणा भजनलालशर्मणा सह वार्तालापं कृत्वा जयपुरस्य दुर्भाग्यपूर्णस्य अग्निकाण्डस्य विषये पृष्टवान्। प्रधानमन्त्रिणा केन्द्रस्य सर्वसम्भवं सहयोगं प्रदातुम् उक्तम्।

## अमित शाह

केन्द्रीय गृहमन्त्री अमितशाहः अद्य पश्चिमबङ्गस्य सिलिगुरीनगरस्य रानीडाङ्गायां सशस्त्रसीमाबलस्य एसएसबी इत्यस्य एकषष्ठी तमे स्थापनादिवस-कार्यक्रमे मुख्यातिथिरूपेण सम्मिलितः। सः हुतात्म्-वीराणां श्रद्धाञ्जलिम् अर्पितवान्, ततः परम् अभिवादनम् अगृह्णात्। कार्यक्रमे एसएसबी इत्यस्य महानिदेशकः अमृतमोहनप्रसादः अपि उपस्थितः आसीत्। अमितशाहः एसएसबी-कर्मचारिभ्यः वीरतापुरस्कारं अपि प्रदत्तवान्। गृहमन्त्री बङ्गप्रदेशस्य पेट्रापोल्-त्रिपुरा अगरतला क्षेत्राणां एकीकृत-चेकपोस्ट इति निरीक्षणस्थले नवनिर्मितस्य आवास-सङ्कुलस्य अपि उद्घाटनं कृतवान्। सः अवदत् यत् एसएसबी नेपाल-भूटान-देशयोः पञ्चाशदधिक चतुः शतोत्तर द्विसहस्र कि.मी. परिमितं यावत् विस्तृत-सीमायाः समर्पणेन रक्षणं तथा मादकद्रव्याणाम् अवैध-हस्तान्तरणस्य निरीक्षणम् अपि करोति। सः त्रिषष्ठ्योत्तर ऊनविंशति शततमे वर्षे SSB इति स्थापनाकालादेव इत्यस्य समर्पणस्य निष्ठायाः च प्रशंसाम् अकरोत्।

## ओम प्रकाश चौटाला

हरियाणा-राज्यस्य पूर्वमुख्यमन्त्री भारतीय-राष्ट्रिय-लोकदलस्य वरिष्ठः नेता च ओम-प्रकाश-चौटाला अद्य गुरुग्राम्-नगरे दिवङ्गतः। सः नवाशीतिः वर्षीयः आसीत्। हरियाणा-राज्यस्य पञ्चवारं मुख्यमन्त्री-पदासीनः पूर्वउप-प्रधानमन्त्रिणः देवीलालस्य पुत्रः च ओम प्रकाश चौटाला स्वीये गुरुग्राम-निवासे हृदयाघातेन पीडितः, तत्क्षणमेव चिकित्सालयं नीतः, परन्तु रक्षितुं न शक्तः। पञ्चत्रिंशदधिक-नवदश-शततमे वर्षे जनवरीमासे जनितः चौटाला वर्यः भारतीय-राजनीतेः प्रमुखेषु अन्यतमः आसीत्। प्रधानमन्त्री नरेन्द्र मोदी ओम प्रकाश चौटाला वर्यस्य निधनविषये दुःखं प्रकटितवान्। स्वीये सन्देशे श्रीमोदी अवदत् यत्, सः बहुभ्यः वर्षेभ्यः राज्यराजनीतौ सक्रियः आसीत्, चौधरी देवीलालस्य कार्यम् अग्रे नेतुं निरन्तरं प्रयतते स्म इति। प्रधानमन्त्री तस्य शोकाकुलपरिवाराय, समर्थकेभ्यः च संवेदनां प्रकटितवान्।

विश्व पैरा एथलेटिक्स प्रतियोगिता

नवदिल्ली आगामिवर्षे नगरस्य जवाहरलालनेहरू-क्रीडाङ्गणे पञ्चविंशत्यधिक द्विसहस्रतम-वर्षस्य विश्वपैरा एथलेटिक्स-प्रतियोगितायाः आयोजनं कर्तुं सज्जः अस्ति। भारते प्रथमवारम् अस्याः प्रतियोगितायाः आयोजनं भविष्यति। आयोजनं सितम्बर-मासस्य षड्विंशतिः दिनाङ्कादारभ्य अक्टूबर-मासस्य पञ्चम-दिनाङ्क पर्यन्तं भविष्यति।